Roll No. ........................ Total No. of Pages : 9

Total No. of Questions : 28

# पूर्वमध्यमा द्वितीयखण्ड (10वीं) वार्षिक परीक्षा 2025–26

## विषय कोड : 1005

## साहित्यम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

निर्देशः— (i) सर्वे प्रश्नाः अनिवार्याः।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

1. उचितविकल्पं चित्वा लिखत— 6×1=6

(i) अलङ्काराः भवन्ति—

(अ) भारादिवत् (ब) हारादिवत्

(स) रसादिवत् (द) लोष्ठादिवत्

(ii) यत्र निह्नुतिं विना हेत्वादिः उन्नीयते तत्र कः अलंकारः भवति ?

(अ) उपमा (ब) अनुप्रासः

(स) रूपकम् (द) उत्प्रेक्षा

(iii) आलम्बनोद्दीपनात्मा ................. भवति।

(अ) सद्भावः (ब) दुर्भावः

(स) विभावः (द) मिलावः

(iv) सुदक्षिणा कस्य पत्नी आसीत् ?

(अ) महाराजरघोः (ब) अजस्य

(स) दिलीपस्य (द) दशरथस्य

(v) रघुवंशमहाकाव्यस्य द्वितीयसर्गे कस्य छन्दसः प्रयोगः वर्तते ?

(अ) अनुष्टुप् (ब) उपेन्द्रवज्रा

(स) इन्द्रवज्रा (द) उपजातिः

(vi) पुत्रार्थं दिलीपः कस्याः सेवां कृतवान् ?

(अ) कामधेनोः (ब) नन्दिन्याः

(स) कपिलायाः (द) सुरभेः

6×1=6

2. प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत –

(i) आवृत्तवर्णस्तवकं स्तवकन्दाङ्कुरं कवेः।
........................ प्रथमाधुर्यमाधुर्यवचसो विदुः। (रूपकम्/यमकम्)

(ii) अनेकार्थयुग्मस्य सादृश्यं ........................। (ललितोपमा/स्तबकोपमा)

(iii) अर्थाः ........................ विधाः भवन्ति। (पञ्च/त्रि)

(iv) "स्ववीर्यगुप्ता हि ........................ प्रसूतिः"। (मनोः/धेनोः)

(v) स्वदेहार्पणनिष्क्रियेण राजा ........................ मोचयितुम् इच्छति। (नन्दिनीं/वन्दिनीम्)

(vi) विद्याधरहस्तमुक्ता पुष्पवृष्टिः ........................ पपात। (सिंहस्य उपरि/दिलीपस्य उपरि)

3. उचितं युग्ममेलनं कुरुत— 6×1=6

| 'क' स्तम्भ | 'ख' स्तम्भ |
| --- | --- |
| (*i*) आवृत्तवर्णसम्पूर्ण | (क) प्रयोजनवती लक्षणा |
| (*ii*) व्यञ्जकः | (ख) वृक्षः |
| (*iii*) गङ्गायां घोषः | (ग) मुख्यार्थः |
| (*iv*) षड्विधा | (घ) वृत्यनुप्रासवद्वचः |
| (*v*) देवदारुः | (ङ) अभिधा |
| (*vi*) अभिधा | (च) व्यञ्जना |

4. शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत— 7×1=7

(*i*) शृंगाररसस्य स्थायीभावः रतिः भवति।

(*ii*) वृत्तेः त्रयः भेदाः न भवन्ति।

(*iii*) शाब्दी आर्थी च व्यञ्जनायाः भेदौ स्तः।

(*iv*) मुख्यार्थः लक्षणाशब्दशक्त्या न बाध्यते।

(*v*) वने नन्दिन्याः मायया सिंहः उपस्थितः।

(*vi*) चन्द्रालोके दशमयूखाः सन्ति।

(*vii*) गुरोर्भवान् दर्शित शिष्यभक्तिः इति सिंहः कथयति।

5. एकवाक्येन उत्तरं लिखत – 7×1=7

(i) कारणं विना अपि कार्यजन्म भवति तदा कः अलङ्कारः भवति ?

(ii) चन्द्रालोके नवमे मयूखे कस्याः शब्दशक्त्याः वर्णनं वर्तते ?

(iii) स्फुटास्फुटभेदेन किं द्विधा विभक्तम् अस्ति ?

(iv) चन्द्रालोके कस्मिन् मयूखे अभिधाशब्दशक्त्याः उल्लेखः वर्तते ?

(v) लक्षणाशब्दशक्तौ कस्य बाधः भवति ?

(vi) महाराज दिलीपस्य गुरोर्नाम किम् ?

(vii) कस्य प्रभावात् अन्तकः अपि गवि प्रहर्तुं न शक्नोति ?

6. चन्द्रालोकानुसारं वृत्यनुप्रासालंकारस्य लक्षणं किमस्ति ? 2

**अथवा**

अर्थश्लेषालंकारस्य लक्षणं किमस्ति ?

7. चन्द्रालोकानुसारम् अलङ्कारस्य परिभाषां लिखत। 2

**अथवा**

दृष्टान्तालङ्कारस्य लक्षणं किमस्ति ?

8. हास्यरसस्य स्थायीभावः कः अस्ति ? 2

**अथवा**

अर्थाः कतिविधाः भवन्ति ? नामानि लिखत।

9. ग्रन्थानुसारं लक्षणायाः स्वरूपं लिखत। 2

**अथवा**

अभिधायाः सोदाहरणं लक्षणं लिखत।

10. पदे लक्षणायाः उदाहरणं लिखत। 2

**अथवा**

आद्याशब्दशक्तिः का कथ्यते ?

11. प्रश्नपत्रे समागतान् श्लोकान् विहाय रघुवंशमहाकाव्यस्य द्वितीयसर्गात् श्लोकमेकं लिखत। 2

12. रेखाङ्कितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत (कोऽपि **द्वौ**)– 2

(*i*) सुश्राव <u>कुञ्जेषु</u> यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः।

(*ii*) निशम्य <u>देवानुचरस्य</u> वाचं मनुष्यदेवः पुनरप्युवाच।

(*iii*) <u>सञ्चारपूतानि</u> दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।

13. अधोलिखितानि वाक्यानि कः कं प्रति कथयति (कोऽपि **द्वौ**)– 2

| | कः | कम् |
|---|---|---|
| (*i*) अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम्॥ | ....... | ....... |
| (*ii*) उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्॥ | ....... | ....... |
| (*iii*) औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः॥ | ....... | ....... |

14. नन्दिनी राजानं किम् आदिदेश ? 2

अथवा

दिलीपः नन्दिनीं किं याचते ?

15. प्रजानामधिपः कीदृशीं धेनुं वनाय मुमोच ? 2

अथवा

शिवः केषां सर्गस्थितिप्रत्यवहारहेतुः राज्ञा उक्तः ?

16. उपमालङ्कारस्य लक्षणोदाहरणं लिखत। 3

अथवा

रूपकालङ्कारस्य लक्षणोदाहरणं लिखत।

17. समासोक्तिः अलङ्कारस्य लक्षणोदाहरणं लिखत। 3

अथवा

विरोधाभासालङ्कारस्य लक्षणोदाहरणं लिखत।

18. व्यञ्जनायाः लक्षणं सोदाहरणं लिखत। 3

अथवा

वस्त्वलङ्कारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ।

अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा॥ (अस्याः कारिकायाः व्याख्या कार्या)

19. अधोलिखितयोः कारिकयोः **एकस्याः** व्याख्या कार्या– 3

(*i*) प्रदीपं वर्धयेत्तत्र तटस्थं मङ्गलोदयः।

पटोऽयं दुग्ध इत्यादौ स्फुटं नास्ति प्रयोजनम्॥

(*ii*) न योगादेरायतनं न संकेतनिकेतनम्।

वृत्या निर्देशशब्दोऽयं मुख्यया स्वाभिधेयया॥

20. अधोलिखितयोः श्लोकयोः कस्यापि **एकस्य** भावार्थः लेख्यः– 3

(*i*) स्थितः स्थितामुच्चलितः प्रयातां, निषेदुषीमासनबन्धधीरः।

जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥

(*ii*) इत्थम् व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः।

सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य॥

21. अधोलिखितयोः श्लोकयोः कस्यापि **एकस्य** भावार्थः लेख्यः– 3

(*i*) एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।

अल्पस्य हेतोर्बहु हातुमिच्छन्विचार मूढः प्रतिभासि मे त्वम्॥

(*ii*) तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।

अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता॥

22. अधोलिखितयोः कारिकयोः **एकस्याः** सोदाहरणं व्याख्या कार्या— 4

(*i*) स्वरव्यञ्जनसन्दोहव्यूहा मन्दोहदोहदा।

गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा॥

(*ii*) वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।

या दातुः सौम्यता सेयं सुधांशोरकलङ्कता॥

23. अधोलिखितयोः कारिकयोः **एकस्याः** सोदाहरणं व्याख्या कार्या— 4

(*i*) विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे।

नमन्तमपि धीमन्तं न लङ्घयति कश्चन॥

(*ii*) प्रतीपमुपमानस्य हीनत्वमुपमेयतः।

दृष्टं चेद् वदनं तस्याः किं पद्मेन किमिन्दुना॥

24. व्यभिचारीभावाः कति भवन्ति ? तेषां नामानि लिखत। 4

**अथवा**

अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत्।

अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥ (एतस्याः कारिकायाः व्याख्या कार्या)

25. अधोलिखितयोः कस्यापि **एकस्य** सप्रसङ्ग व्याख्या कार्या– 4

(*i*) अथ प्रजानामधिपः प्रभते जायाप्रतिग्राहितगन्धमाल्याम्।

वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच॥

(*ii*) कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिना त्वगस्य।

अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः॥

26. अधोलिखितयोः कस्यापि **एकस्य** सप्रसङ्ग व्याख्या कार्या– 4

(*i*) निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच।

धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः॥

(*ii*) भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र! वरं वृणीष्व।

न केवलानां पयसां प्रसूतिमवेहि मां कामदुधां प्रसन्नाम्॥

27. "हारादिवदलंकाराः" इत्यस्य व्याख्या कार्या। 5

**अथवा**

काव्ये अलंकाराणाम् उपादेयत्वम् किम् ? लिखत।

28. द्वितीयसर्गानुसारं दिलीपस्य गौसेवां वर्णयत। 5

**अथवा**

स्वभाषायां रघुवंशमहाकाव्यस्य द्वितीयसर्गस्य कथासारं शतशब्देषु लिखत।